# का शि का

## तृतीयोऽध्यायः

### प्रथमः पादः

**प्रत्ययः । (१/१८०)**

[1]अधिकारोऽयम् । प्रत्ययशब्दः सञ्ज्ञात्वेनाधिक्रियते । आ पञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामः, प्रत्ययसञ्ज्ञास्ते वेदितव्याः, प्रकृत्युपपदोपाधिविकारागमान् वर्जयित्वा । वक्ष्यति — 'तव्यत्तव्यानीयरः' (३.१.९६/२८३४) । कर्तव्यम् । करणीयम्[2] । प्रत्ययप्रदेशाः – 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१.१.६२/२६२) इत्येवमादयः ॥

**परश्च । (२/१८१)**

अयमप्यधिकारो[3] योगे योगे उपतिष्ठते, परिभाषा वा । परश्च [4]स भवति धातोर्वा प्रातिपदिकाद् वा यः प्रत्ययसञ्ज्ञः । कर्तव्यम्[5] । तैत्तिरीयम् (४.३.१०२/१४८२) । चकारः पुनरस्यैव समुच्चयार्थः । तेनोणादिषु परत्वं न विकल्प्यते ॥

**आद्युदात्तश्च । (३/३७०८)**

अयमप्यधिकारः[6] परिभाषा वा । आद्युदात्तश्च स भवति यः [7]प्रत्ययसञ्ज्ञः । अनियतस्वरप्रत्ययप्रसङ्गे[8]ऽनेकाक्षु च प्रत्ययेषु देशस्यानियमे सति वचनमिदमादेरु[9]दात्तार्थम् । कर्तव्यम्[10] । [11]तैत्तिरीयम् ॥

**अनुदात्तौ सुप्पितौ । (४/३७०९)**

पूर्वस्यायमपवादः । सुपः पितश्च प्रत्यया अनुदात्ता भवन्ति । [12]दृषदौ । दृषदः । पितः खल्वपि — पचति । पठति ॥

**गुप्तिज्किद्भ्यः सन् । (५/२३९३)**

'गुप गोपने' (धा.पा. ९७१), 'तिज [13]निशाने' (धा.पा. ९७२), 'कित निवासे' (धा.पा. ९९४) एतेभ्यो धातुभ्यः सन् प्रत्ययो भवति । प्रत्ययसञ्ज्ञा चाधिकृतैव । जुगुप्सते । तितिक्षते । चिकित्सति ।

[१७८] निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यतेऽन्यत्र [14]यथाप्राप्तं प्रत्यया भवन्ति ।

गोपयति । तेजयति । सङ्केतयति । गुपादिष्वनुबन्धकरणमात्मनेपदार्थम् (म.भा. २. १०) ॥

---

1. अधिकारोऽयम् नास्ति ग.फ. 2. तैत्तिरीयम् इत्यधिकम् अ.ब.क.ड.ह. 3. वेदितव्यः इत्यधिकम् अ.फ. 4. स नास्ति फ़. 5. करणीयम् इत्यधिकम् अ.फ. 6. योगे योगे उपतिष्ठते इत्यधिकम् फ. 7. प्रत्ययसञ्ज्ञकः ग.फ. 8. सति इत्यधिकम् फ, अनेकाक्षु नास्ति ग. 9. उदात्तार्थे ब. 10. करणीयम् इत्यधिकम् ग. 11. नास्ति ग. 12. दृषद् इत्यधिकम् फ. 13. निशातने ग.फ. 14. तु इत्यधिकम् क.